भरटकद्वात्रिंशिका

R/503

संपादन तथा अनुवाद
राधावल्लभ त्रिपाठी

भरटकद्वात्रिंशिका

भरटकों की बत्तीस कथाएँ,
संस्कृत कथा साहित्य की अज्ञात
और दुर्लभ कृति, हिन्दी अनुवाद
सहित. संपादन तथा अनुवाद
राधावल्लभ त्रिपाठी.

प्रकाशक
संस्कृत परिषद्
विश्वविद्यालय, सागर (म० प्र०)

प्रथम संस्करण

1987

मूल्य : पंद्रह रुपया

मुद्रक : एकेडमी प्रेस,
दारागंज, इलाहाबाद

Bharatakadvātriṅśikā : a collection of thirty-two tales in Sanskrit with Hindi translation. Edited and translated by Radhavallabh Tripathi. First Ed. 1987 Pub. by Sanskrit Parishad, University, Sagar, M. P., INDIA.

भूमिका

'भरटकद्वात्रिंशिका' संस्कृत-कथा-साहित्य की विस्मृतप्राय किन्तु अत्यन्त महत्वपूर्ण कड़ी है। पञ्चतन्त्र, वैतालपञ्चविंशति और शुकसप्तति की सार्वभौम कथा परम्परा में यह एक नया आयाम जोड़ती है। मूर्खों या प्रचलित व्यवस्था के बाहर रहने वाले लोगों के चरित्र को लेकर रचा गया कदाचित यही एक प्राचीन कथा संग्रह हमें हमारी विरासत ने दिया है। कथा-साहित्य की यह अज्ञात धरोहर इस संस्करण के साथ पहली बार भारत में प्रकाशित और उपलब्ध हो रही है।

संस्करण तथा हस्तलिखित प्रतियाँ

'भरटकद्वात्रिंशिका' का एकमात्र प्रकाशित संस्करण प्रसिद्ध भारतीय विद्याविद् श्री हर्तेल के संपादन में लाइपजिग से १९२२ ई० में छपा था। सम्प्रति यह दुष्प्राप्य है।

श्री हर्तेल को इसकी एक हस्तलिखित प्रति १९१३ ई० में उपाध्याय इन्द्रविजय जी से मिली थी। इसकी एक प्रति कलकत्ता में होने का भी उल्लेख मिलता है। आफ्रेख्ट ने बोदेलियन पुस्तकालय की हस्तलिखित ग्रथसूची भाग-१ में क्र० ३२९ पर इस पुस्तक की पांडुलिपि का विवरण दिया है। उपाध्याय इन्द्रविजय जी के पास इसकी एक प्रति और थी, जिसका अब पता नहीं चलता। १८६० में वेबर ने जर्मन भाषा में भद्रा० का अंशतः अनुवाद किया था। इसका एकमात्र पूर्ण अनुवाद स्वयं हर्तेल ने जर्मन भाषा में किया, जो लाइपजिग से प्रकाशित है।

लेखक तथा रचनाकाल

'भरटकद्वात्रिंशिका' का लेखक संभवतः कोई जैन साधु था, जिसका नाम ज्ञात नहीं है। हर्तेल ने उल्लेख किया है कि उपाध्याय इंद्रविजय जी के पास की पांडुलिपि की पुष्पिका में यह वाक्य था—

'तपागणाधीश्वरसोमसुन्दरान्तेवासिनो वाचकचक्रचक्रिणः श्रीसाधुराजादधिगम्य कोतुकादलेखि शिष्येण यथाश्रुतं त्विदम्।'

इसके अनुसार श्री सोमसुन्दर के शिष्य श्री साधुराज से सुनी हुई कथाओं को उनके (साधुराज के) शिष्य ने इस पुस्तक में लिखा था। हर्तेल का अनुमान है कि उक्त साधुराज तथा हरिभद्रकृत 'योगदृष्टिसमुच्चय' में उल्लिखित देवसुन्दर के शिष्य

और चित्रस्तोत्र का कर्ता श्री साधुराज एक ही व्यक्ति है। देवसुन्दर का समय सं० १३९६ (१३३९-४० ई०) उल्लिखित है।

इस प्रकार साधुराज का समय चौदहवीं शताब्दी का उत्तरार्ध प्रतीत होता है। इनके शिष्यों में मुनिसुन्दर का उल्लेख मिलता है। हर्तेल का कहना है कि मुनिसुन्दर ही इन कथाओं के संकलनकर्ता और लेखक हैं।

भरटक का अर्थ

'भरटक' शब्द इस कथासंग्रह में शिवभक्तों के एक संप्रदाय-विशेष के साधुओं के लिये प्रयुक्त हुआ है। गुजराती में इसी का तद्भव 'भरडो' शब्द प्रचलित है, जो शिव-भक्त के लिये प्रयुक्त होता है। 'भरटक' शब्द इसी अर्थ में 'शुकसप्तति' तथा हेमविजय के 'कथारत्नाकर' में भी आया है।

भरटक 'जड-भरत' की परम्परा के साधु प्रतीत होते हैं। व्यवस्था से बाहर रहने के कारण ही संभवतः वे उपहास के पात्र बनाये जाते रहे होंगे, और उनकी कथित मूर्खता या जडबुद्धि के किस्से चल पड़े होंगे।

राजशेखर सूरि ने 'षड्दर्शनसमुच्चय' में 'भरटक' को परिभाषित करते हुए बताया है कि किसी भी वर्ण का व्यक्ति भरटक-संप्रदाय का व्रत ले सकता है, इसके लिये जात-पाँत का बन्धन नहीं है, केवल शिव में भक्ति होना चाहिये—

भरटानां व्रतादाने वर्णव्यक्तिर्न काचन।
यस्य पुनः शिवे भक्तिर्व्रती स भरटो भवेत् ॥

(ष० द० स०, यशोविजयग्रंथमाला—१७, पृ० ४४)

ष० द० स० की टीका में इस स्थल की व्याख्या करते हुए कहा गया है कि भरट, भक्त, लैंगिक, तापस आदि एक ही समाज के अंतर्भेद हैं।

'तेषामन्तर्भेदा भरटभक्तलैङ्गिकतापसादयो भवन्ति। भरटादीनां व्रतग्रहणे ब्राह्मणादिर्वर्णनियमो नास्ति। यस्य तु शिवे भक्तिः, स व्रती भरटादिर्भवेत्।"

सारी कथाएँ भरटक-समाज के साधुओं पर हैं, पर सांप्रदायिक दृष्टि ने इनके कथा-रूप को कोई क्षति नहीं पहुँचाई है। 'भरटक' के पर्याय के रूप में यहाँ भौत, भौतिक और जटी शब्द भी प्रयुक्त हैं। भूतपति (शिव) का भक्त—यही भौत या भौतिक का भी अर्थ है।

भूगोलिक क्षेत्र

भरटकद्वात्रिंशिका गुजरात की जैन-कथा-परम्परा की एक कड़ी है। इसकी कथाओं का क्षेत्र गुजरात तथा मारवाड़ में केन्द्रित है। प्रत्येक कथा में एक नगर या

ग्राम का नाम पहले ही वाक्य में दिया है। सम्भवतः ये सारे नगर, ग्राम उक्त क्षेत्र में उस समय विद्यमान रहे हों। तथापि भूगोल की दृष्टि से इन कथाओं का सूक्ष्मेक्षिकापूर्वक लगातार परिशीलन अपेक्षित है। वस्तुतः भद्वा० की पूरी नामावली ही बड़ी रोचक तथा अध्येतव्य है।

कथाओं का वैशिष्ट्य

'भरटकद्वात्रिंशिका' कहानी की भारतीय परम्परा में अपने ढङ्ग की अनूठी कृति है। यह कहानी की वाचिका परम्परा का रूप सामने रखती है। लेखक ने स्वयं विनम्रता के साथ स्वीकार किया है कि उसने जिस रूप में ये कथाएँ सुनी, उसी रूप में लिखी हैं। विषयवस्तु की दृष्टि से इन कथाओं को कथासरित्सागरकार सोमदेव की शब्दावली में 'मुग्धकथा' का नाम दिया जा सकता है। 'भरटकद्वात्रिंशिका' संस्कृत साहित्य में मुग्धकथाओं का एकमात्र संकलन है।

ये कहानियाँ भरटकों का मखौल उड़ा कर उसके माध्यम से मूढ़ता और अनवधानता का परिहार करने की दृष्टि से लिखी गयी हैं, मूर्खों के बारे में प्रचलित कुछ लोक कथाओं को भी यहाँ भरटकों पर आरोपित कर प्रस्तुत किया गया है। कुछ कहानियाँ चुटकुलों जैसे हल्के-फुल्के परिहास या उपहास तक ही सीमित रह गयी हैं। कुछ कहानियाँ भ रटक-समाज के उजड्ड और उजबक चरित को रोचक स्थितियों में प्रस्तुत करती हैं, और इससे आगे बढ़ कर कुछ इनी-गिनी कहानियाँ भरटकों के उस विशेष तेवर से साक्षात्कार कराती हैं, जिसमें वे वर्जनाओं को तोड़ने या व्यवस्था को संपुष्टि न देने के कारण प्रतारित होते हैं। पहली ही कहानी इसका अच्छा उदाहरण है। एक विसंगत स्थिति की छानबीन जिस सामाजिक चेतना के साथ इसमें की गयी है, वह इसे महत्वपूर्ण बना देती है। पाँचवीं कहानी में एक ग्राम कवि की कंगाली और व्यथा को भी विसंगति पर प्रश्नचिह्न लगाते हुए व्यक्त किया गया है। मध्ययुगीन भारतीय समाज का एक जीता-जागता रूप इन कहानियों में चित्रित है।

'पञ्चतन्त्र' की कथा-परम्परा का प्रभाव इन कहानियों में अंतर्गुंफित है। पहली कहानी में तो सीधे-सीधे पंचतंत्र से पद्य उद्धृत कर वहाँ की एक कथा का हवाला दिया गया है, तीसरी कहानी भी 'पञ्चतन्त्र' की एक कथा की पुनःप्रस्तुति है। पच्चीसवीं कहानी कालिदास के द्वारा पेड़ की डाल काटने की किंवदन्ती को विस्तार देती है। फिर भी ये कहानियाँ समाज के उस तबके को सामने लाती हैं, जो इतर कथा परम्पराओं में इस रूप में नहीं आया था। वे मध्यकालीन समाज के बारे में हमारी जानकारी में बहुत कुछ जोड़ सकती हैं, और हमारे सामाजिक इतिहास के अध्ययन के लिये महत्वपूर्ण सामग्री उनमें है।

भाषा-शैली

'भरटकद्वात्रिंशिका'' के गद्य में भी कथा-कथन की शैली का प्रभाव है। बाण या सुबन्धु की काव्यात्मकता और जटिल बिंबविधान से वह अछूता है। भाषा प्रायः अनगढ़ है, 'पञ्चतन्त्र' या 'हितोपदेश' के जैसा भी परिष्कार उसमें नहीं है। वैयाकरणिक अशुद्धियों और देशज शब्दों की उसमें भरमार है। गुजरात और राजस्थान में प्रचलित बोलियों की वाक्य रचना और मुहावरे यहाँ व्यवहृत हुए हैं। बोलचाल की भाषा का बहुत सहज और संप्रेष्य रूप हम इन कहानियों में देख सकते हैं।

'भरटकद्वात्रिंशिका' में व्यवहृत अनेक देशज शब्द अभी भी गुजराती, मेवाड़ी और मालवी बोलियों में प्रचलित हैं। उदाहरण के लिये—कटुच्छुक (कड़छू), कच्छोटिका (कछौटी), डंगरडुं (डूंगरी), कट्टोरक (कटोरा), गुणयन्ति (गुनते हैं—पढ़ने के अर्थ में), भाणित (पढ़ाया हुआ, मालवी में भन्या-गुन्या), डोलि (डोलची), भाई (बाई), कोष्ठिका (कोठी—ड्रम के अर्थ में)।

इसके अतिरिक्त तत्सम शब्दों के स्थान पर भरटकद्वात्रिंशिका के लेखक ने तद्भव या अपभ्रंश के शब्दों का उपयोग कर भाषा के साथ खूब छूट ली है। संभाल्य (संभाल कर), उत्काल्य (उकाल कर), इकुपरि (एकोपरि), भंइसी (भैंस), गदयल (नदी), चटति (चढ़ा), छोटयित्वा (छोड़कर), पिट्टनम् (पिटाई), लघुनीत्यर्थं (पेशाब के लिये) खरडियुं (सूखा), खरडकुं (झरना), डुबिका (डुबकी), टालन (टालना), छूटिष्यते (छूटेगा) इत्यादि प्रयोग भारतीय भाषाओं के वर्तमान रूप की झलक देते हुये आर्य भाषा के अंतिम चरण के विकास की पृष्ठभूमि सूचित करते हैं। अपभ्रंश की गाथाएँ या वाक्य कथाओं में कुछ स्थलों पर उद्धृत हैं। हर्तेल ने आलमालम् जैसे शब्दों के प्रयोग में अरबी (अल्लम-गल्लम्) का प्रभाव भी देखा है।

प्रस्तुत संकरण

इस संस्करण के साथ 'भरटकद्वात्रिंशिका' पहली बार हिंदी या किसी भी भारतीय भाषा में अनूदित होकर प्रस्तुत हो रही है। अभी तक जर्मन को छोड़ कर अन्य किसी भी भाषा में इस कृति का अनुवाद नहीं हुआ है। मूल संस्कृत का यहाँ प्रस्तुत पाठ हर्तेल के द्वारा संपादित संस्करण पर आधारित है, जिसकी प्रति हुम्बोल्त विश्वविद्यालय के पुस्तकालय के सौजन्य से प्राप्त हुई। हर्तेल के संस्करण में अनेक स्थलों पर पाठ त्रुटित या अशुद्ध है, जिसे यहाँ यथाशक्य संशोधित किया गया है।

●

भरटकद्वात्रिंशिका

(मूल)

भरटकद्वात्रिंशिका

अर्हम् ॥ श्रीशारदायै नमः ॥

देवदेवं नमस्कृत्य श्रीगुरूंश्च यथाश्रुतं ।
द्वात्रिंशद्भरटकानां लिख्यंते कौतुकात्कथाः ॥

इह हि जगति सर्वैरपि श्रेयोर्थिभिः पुंभिर्निःश्रेयसावाप्तये सदापि सदाचरण-ज्ञानप्रगुणैर्भाव्यं । सदाचरणपरिज्ञानं च मूर्खजनचरितं यत्तत्स्वबुद्धिकल्पितवस्तुप्रवर्तना-नर्थदर्शनेन व्यक्तीभवति । अतस्तद्व्यक्तये मूर्खचरितपरिहाराय च भरटकद्वात्रिंशिका प्रारभ्यते । यथा ॥

समे कार्ये हि सर्वस्य सर्वे सन्ति सहायकाः ।
विषमे न पुनः कश्चित् धनदश्रेष्टिनो यथा ॥

तथा हि ॥ भरतेत्र श्रीश्रीपुरे पुरे महीपतिर्नृपतिरभूत् । तत्र च स्वधनजित-धनदो धनदो नाम श्रेष्टी वसति स्म "समस्तपुरप्रधानः । तस्य स्वरूपनिर्जिताशेष-विद्याधरीरूपा मुख्या नाम जायास्ति श्रेष्टिनः श्रेष्टप्रीतिपात्रम् । एकस्मिन्दिने तस्य श्रेष्टिनो गृहे झगटको ताम भरटको भिक्षायै समायातः । तस्य च भिक्षां ददत्याः सुरूपाया रूपातिशयविस्मयाच्चिरतरं चक्षुषी विकास्य निभालयन्तं भौतिकं दृष्ट्वा श्रेष्टी रुष्टः प्रोवाच–'अरे मूर्ख भिक्षुकाधम दुराचार कस्मादतिमात्रं मद्भार्यां विलोकयसि ।' ततः सोपि रुष्टः सन्वक्ति । 'रे श्रेष्टिन्, यदि स्वभावान्निरूपन्यन्तं निर्दोषमपि मां सेर्ष्यतयाधिक्षिपसि तदा बलात्कारेणाप्येनां त्वद्भार्यां लात्वैव तव गृहाद्यास्यामि नान्यथा ।' इत्युक्त्वा तद्गृहे लङ्घितुमुपविष्टः । तदा श्रेष्टिना विरूप-वचनैर्बहु धिक्कृतोपि कथमपि नोत्तिष्टति । बहूनि लङ्घनानि च जातानि । तदा श्रेष्टिनातिहितमित्रारक्षकमन्विनृपा विज्ञप्ताः स्वभार्यामार्गणव्यतिकरम् । तदा तैः सर्वैरप्युक्तम्—'भोः श्रेष्टिन्, सर्वथा त्वया स्वजाया नार्पणीया । अयं मूर्खः क्वापि वाते शयितः । तेनालमालं लपति ।' श्रेष्टिनोक्तम्—'स लंघनैर्मरिष्यति । तदा किम् ?'

मित्रादिभिरुक्तम् 'सम्प्रत्येव म्रियताम् न भवतः किमपि दूषणम् । एवं हि भार्याः प्रार्थ्यमानाः किं केनापि दीयन्ते ?' एव श्रुत्वा श्रेष्ठी हृष्टः । ततश्च बहलङ्घनभयेन श्रेष्ठिनाचिन्ति । मृतेस्मिन् किमेते मित्रादयो वाङ्मात्रसारा मम सहाया भविष्यन्ति न वेति विलोकयामि । यतः ।

अनागतं यः करुते स शोभते । न शोभते यः कुरुते त्वनागतम् ।
वनेऽत्र संस्थस्य जरा ह्युपागता । विलस्य वाचो न कदापि निर्गता ॥[1]

इति परीक्षार्थं पूर्वं श्रेष्ठिना मित्राग्रे प्रोक्तं । 'भो मित्र स जटी बुभुक्षया मृतः । किं करिष्यते । सार्धमागच्छ । आरक्षकस्य कथ्यते ।' तदा मित्रेणोक्तम् 'श्रेष्ठिन् त्वया न युक्तं कृतम् । एवं मर्तुं कस्मादृतः ? केनापि प्रकारेणोत्थापितः कुतो न ? यत एतद्भवतो महादूषणं जातम् । यदि राजा ज्ञास्यति तदा महानर्थो भावी ।' श्रेष्ठिना प्रोक्तम् 'मया भवतामग्रे पूर्वमेवोक्तं यदुतायं लङ्घनैर्मरिष्यति । भवद्भिश्च प्रोक्तम् मरिष्यति-तदा म्रियताम् इति भवद्वचसा मया नोत्थापितः । अतः कारणादागच्छ । तत्स्वरूपं आरक्षकादीनां ज्ञाप्यते । अन्यथा ते लोकेभ्यो वार्तां श्रुत्वानर्थं करिष्यन्ति ।' ततो मित्रेण चिन्तितम् 'एतस्यान्यायकारिणः साहाय्यान्ममापि दण्डादि भविष्यति । ततः सकाल एव पलायनं श्रेयः । इति विचिन्त्य प्रोक्तम्—'भोः श्रेष्ठिन् त्वमग्रतश्चल । अथाहमागच्छामि ।' इति श्रेष्ठिनि चलिते स नष्टः । ततः श्रेष्ठिना चिन्तितम् अहो संप्रति कष्टम् । मित्रमप्यमित्रीभूत् । ततः श्रेष्ठिनारक्षकमनिणोरिदं स्वरूपं प्रोक्तम् । ताभ्यामपि श्रेष्ठी तथैव भृशमुपालब्धः । ततो राज्ञः प्रोक्तम् । ततो राज्ञाप्युक्तम् 'भोः श्रेष्ठिन्, मन्नगरे त्वमेव मुख्यः सर्वमर्यादास्थानं बहुमान्योप्येवमन्यायं कुरुषे । तदा को नाम न्यायी भविष्यति । यतस्त्वया स्वयमेव द्रव्यलोभेन गृहे क्षिप्त्वा मारितो भविष्यति । मदग्रे तु मुधा रावं कुरुषे । अन्यथा कोपि कस्यापि भार्यां मार्गयति । इति त्वमेव दण्डार्हः ।' ततो राज्ञा स्वसेवकाः प्रोक्ताः । 'भो भो भटाः एवं श्रेष्ट्यपसदं पापिष्ठं तपस्विहत्याकारकं बध्नीध्वं बध्नीध्वम् । एतदीयं सर्वं गृहसारमत्रानीयताम् । ततः श्रेष्ठी खिन्नश्चिन्तयति—अहो ममैतं रेव प्राक् तथा प्रोक्तम् सम्प्रति तु विपरीतं भाषन्ते स्वार्थनिष्ठाः परविघ्नसन्तोषिणः । सर्वोपि लोकः स्वकार्यकारी सम एव सहायो न तु विषमकार्ये । यतः ।

वाङ्मात्रमैत्रीमधुरो जनोयं । न मूढकार्ये घटते सहायः ।
अनन्यसाध्यां जठरस्य यात्रां । साद्धुं जने वासमुशन्ति धीराः ॥

ततः श्रेष्ठिना राजाग्रे प्रोक्तम्—'भोः स्वामिन् क्षणं प्रतीक्षध्वम् । एकशो गृहे गत्वा सर्म्यग्विलोकयामि । कदाचिद्यदि जीवन्भवति तदा मानयित्वोत्थापयामि । मया

---

१. ...स शोच्यते यो न करोत्यनागतम् ।
वनेऽत्र संस्थस्य समागता जरा, बिलस्यवाणी न कदापि मे श्रुता ।
इति पञ्चतन्त्रे, काकोलूकीये एकादशकथायां पाठः ।

तु श्वसन्मुक्तोभूत् । ततः श्रेष्ठिनानन्यगतिकत्वेन गृहे समेत्य पादयोर्लगित्वा सविनयवचनैः स भौतिक उत्थापितः । प्रोक्तं च 'भो गृहाण मद्भार्यां सारालंकारभूषितां भोजनं च कुरु । अन्यदपि द्रव्यादि गृहाण ।' तदा तदीयविनयवचनामृततृप्तो भौतिक उत्थाय श्रेष्ठिनमवादीत् । 'भो मम सर्वथा स्त्रिया द्रव्येण च किमपि कार्यं नास्ति । अहं ब्रह्मचारी निरीहो भैक्षभोजी भवद्वचनादेव दूनो हठादुपविष्टः ।' ततो भोजनं कृत्वा स स्वस्थाने गतः । श्रेष्ठिन आनन्दः । राजादयो रञ्जितास्तद्बुद्धिविभवेन । इति प्रथमा कथा ॥१॥

कोपि स्वप्नोपलब्धेर्थे प्रवर्तेत नरो जडः ।
पक्वान्नसम्भृतमठी स्वप्नद्रष्टा यथा जटी ॥

नन्दिग्रामे दुर्मतिनामा भरटको वसति सर्वलोकेभ्यो भोजनाजीवी । स एकदा शरदि कस्यापि कौटुम्बिकस्य गृहे भिक्षार्थं गतः । तेन गृहस्वामिना माहिषं सुशीतलं पिण्डरूपं दधि यथेष्टं दत्तम् । तेन हृष्टेन मठिकामागत्य कण्ठलौल्याद्दधि भुक्तम् । तद्वशान्निशि तस्य निद्रा भृशमागता । ततो निद्रामध्ये स्वप्नं पश्यति । यथा । ममैषा मठी सर्वापि विविधपक्वान्नखाद्यपेयादिरसवतीपरिपूर्णास्तीत्यादि । ततो जागरूकः संश्चिन्तयति । ममैषा मठी सर्वापि भोज्यपूर्णास्ति । अहमेकाकी चेत्तावता भोज्येन किं करिष्ये । सर्वं मुधैव मा विनश्यतु । ततोद्य यथेष्टदायकं लोकं सकलं भोजयास्यनृणीभवामि च । तत उत्थाय मठिकायामेव तालकं दत्त्वा सर्वोपि लोकः सकुटम्बो भोजनाय निमन्त्रितः । ग्राममध्ये सर्वगृहेषु चुल्हकेषु वारि क्षिप्तम् । एवं मध्याह्ने सर्वस्मिंल्लोके मिलिते भोक्तुं समुत्सुक आसनानि मण्डितानि । पङ्क्तिरुपविष्टा । ततो यावता भौतिको मठीद्वारमुद्घाट्य पश्यति तावता किमपि न पश्यति । रिक्तैव मठी । ततः स तरललोचन इतस्ततः कोणकादिकं सर्वं विलोकयति । परं किमपि न पश्यति । तावता तथैव रात्रिवन्मण्डपे पटौ विस्तार्य स्वप्नार्थं सुप्तः । लोकाः सर्वेपि बुभुक्षया म्रियमाणाः परिवेषणाय तमाकारयन्ति । कथयन्ति च । कुतः स्वपिषि । कस्मान्न परिवेषयसि । स प्रतिवक्ति । 'भो लोकास्तावता प्रतीक्षध्वं यावता विविधपक्वान्नाविभृतमठिकां स्वप्नदर्शनवत्संप्रत्यपि दृष्ट्वा सर्वं भोज्यमानीय युष्मान्भोजयामि । इति तद्वाक्यश्रवणोद्भूतकोपाटोपा लोकास्तन्मौर्ख्यं निंदंतः स्वगृहे गताः कष्टेन पाश्चात्यप्रहरे भुक्ताः । एवं धीमद्भिः स्वप्नोपलब्धमात्रेण न प्रवर्तितव्यम् । इति द्वितीया कथा ॥२॥

माया क्वापि न कर्तव्या सुधिया स्वहितैषिणा ।
सानर्थाय कृता कन्यार्थिके भरटके यथा ॥

गङ्गातीरे भीमपुरं नाम पुरम् । तदुपरिष्टात्सुवर्णपुरमस्ति । तत्र सुलोचनः श्रेष्ठी वसत्यत्यन्तधनी भौतिकभक्तश्च । तस्य पद्मिनी भार्या । तयोः सुखमनुभवतोः सप्तसुतोपरि बहु प्रार्थ्यमानैका रुक्मिणी नाम कन्या जाता । सा क्रमेण वर्धमाना

मित्रादिभिरुक्तम् 'सम्प्रत्येव क्रियताम् न भवतः किमपि दूषणम् । एवं हि भार्याः प्रार्थ्यमानाः किं केनापि दीयन्ते ?' एवं श्रुत्वा श्रेष्ठी हृष्टः । ततश्च बहलङ्घनभयेन श्रेष्ठिनाचिन्ति । मृतेस्मिन् किमेते मित्रादयो वाङ्मात्रसारा मम सहाया भविष्यन्ति न वेति विलोकयामि । यतः ।

अनागतं यः करुते स शोभते । न शोभते यः कुरुते त्वनागतम् ।
वनेऽत्रसंस्थस्य जरा ह्युपागता । विलस्य वाचो न कदापि निर्गता ॥[1]

इति परीक्षार्थं पूर्वं श्रेष्ठिना मित्राग्रे प्रोक्तं । 'भो मित्र स जटी बुभुक्षया मृतः । किं करिष्यते । सार्धमागच्छ । आरक्षकस्य कथ्यते ।' तदा मित्रेणोक्तम् 'श्रेष्ठिन् त्वया न युक्तं कृतम् । एवं मर्तुं कस्माद्धृतः ? केनापि प्रकारेणोत्थापितः कुतो न ? यत एतद्भवतो महादूषणं जातम् । यदि राजा ज्ञास्यति तदा महानर्थो भावी ।' श्रेष्ठिना प्रोक्तम् 'मया भवतामग्रे पूर्वमेवोक्तं यदुतायं लङ्घनैर्मरिष्यति । भवद्भिश्च प्रोक्तम् मरिष्यति-तदा क्रियताम् इति भवद्वचसा मया नोत्थापितः । अतः कारणादागच्छ । तत्स्वरूपं मारक्षकादीनां ज्ञाप्यते । अन्यथा ते लोकेभ्यो वार्तां श्रुत्वानर्थं करिष्यन्ति ।' ततो मित्रेण चिन्तितम् 'एतस्यान्यायकारिणः साहाय्यान्ममापि दण्डादि भविष्यति । ततः सकाल एव पलायनं श्रेयः । इति विचिन्त्य प्रोक्तम्—'भोः श्रेष्ठिन् त्वमग्रतश्चल । अथाहमागच्छामि ।' इति श्रेष्ठिनि चलिते स नष्टः । ततः श्रेष्ठिना चिन्तितम् अहो संप्रति कष्टम् । मित्रमप्यमित्रीभूत् । ततः श्रेष्ठिनारक्षकमनिणोरिदं स्वरूपं प्रोक्तम् । ताभ्यामपि श्रेष्ठी तथैव भृशमुपालब्धः । ततो राज्ञः प्रोक्तम् । ततो राज्ञाप्युक्तम् 'भोः श्रेष्ठिन्, मन्नगरे त्वमेव मुख्यः सर्वमर्यादास्थानं बहुमान्योऽप्येवमन्यायं कुरुषे । तदा को नाम न्यायी भविष्यति । यतस्त्वया स्वयमेव द्रव्यलोभेन गृहे क्षिप्त्वा मारितो भविष्यति । मदग्रे तु मुधा रावं कुरुषे । अन्यथा कोपि कस्यापि भार्यां मार्गयति । इति त्वमेव दण्डार्हः ।' ततो राज्ञा स्वसेवकाः प्रोक्ताः । 'भो भो भटाः एवं श्रेष्ट्यपसदं पापिष्टं तपस्विहत्याकारकं बध्नीध्वं बध्नीध्वम् । एतदीयं सर्वं गृहसारमत्रानीयताम् । ततः श्रेष्ठी खिन्नश्चिन्तयति—अहो ममैतं रेव प्राक् तथा प्रोक्तम् सम्प्रति तु विपरीतं भाषन्ते स्वार्थनिष्ठाः परविघ्नसन्तोषिणः । सर्वोपि लोकः स्वकार्यकारी सम एव सहायो न तु विषमकार्ये । यतः ।

वाङ्मात्रमैत्रीमधुरो जनोयं । न मूढकार्ये घटते सहायः ।
अनन्यसाध्यां जठरस्य यात्रां । साद्धुं जने वासमुशन्ति धीराः ॥

ततः श्रेष्ठिना राजाग्रे प्रोक्तम्—'भोः स्वामिन् क्षणं प्रतीक्षध्वम् । एकशो गृहे गत्वा सम्यग्विलोकयामि । कदाचिद्यदि जीवन्भवति तदा मानयित्वोत्थापयामि । मया

---

१. ...स शोच्यते यो न करोत्यनागतम् ।
वनेऽत्र संस्थस्य समागता जरा, विलस्यवाणी न कदापि मे श्रुता ।
इति पञ्चतन्त्रे, काकोलूकीये एकादशकथायां पाठः ।

तु श्वसन्मुक्तोभूत् । ततः श्रेष्ठिनानन्यगतिकत्वेन गृहे समेत्य पादयोर्लगित्वा सविनयवचनैः स भौतिक उत्थापितः । प्रोक्तं च 'भो गृहाण मद्भार्यां सारालंकारभूषितां भोजनं च कुरु । अन्यदपि द्रव्यादि गृहाण ।' तदा तदीयविनयवचनामृततृप्तो भौतिक उत्थाय श्रेष्ठिनमवादीत् । 'भो मम सर्वथा स्त्रिया द्रव्येण च किमपि कार्यं नास्ति । अहं ब्रह्मचारी निरीहो भैक्षभोजी भवद्वचनादेव दूनो हठादुपविष्टः ।' ततो भोजनं कृत्वा स स्वस्थाने गतः । श्रेष्ठिन आनन्दः । राजादयो रञ्जितास्तद्बुद्धिविभवेन । इति प्रथमा कथा ॥१॥

कोपि स्वप्नोपलब्धेर्थे प्रवर्तेत नरो जडः ।
पक्वान्नसम्भृतमठी स्वप्नद्रष्टा यथा जटी ॥

नन्दिग्रामे दुर्मतिनामा भरटको वसति सर्वलोकेभ्यो भोजनाजीवी । स एकदा शरदि कस्यापि कौटुम्बिकस्य गृहे भिक्षार्थं गतः । तेन गृहस्वामिना माहिषं सुशीतलं पिण्डरूपं दधि यथेष्टं दत्तम् । तेन हृष्टेन मठिकामागत्य कण्ठलौल्याद्दधि भुक्तम् । तद्दशान्निशि तस्य निद्रा भृशमागता । ततो निद्रामध्ये स्वप्नं पश्यति । यथा । ममैषा मठी सर्वापि विविधपक्वान्नखाद्यपेयादिरसवतीपरिपूर्णास्तीत्यादि । ततो जागरूकः संश्चिन्तयति । ममैषा मठी सर्वापि भोज्यपूर्णास्ति । अहमेकाकी चैतावता भोज्येन किं करिष्ये । सर्वं मुधैव मा विनश्यतु । ततोद्य यथेष्टदायकं लोकं सकलं भोजयाम्यनृणीभवामि च । तत उत्थाय मठिकायामेव तालकं दत्त्वा सर्वोपि लोकः सकुटम्बो भोजनाय निमन्त्रितः । ग्राममध्ये सर्वगृहेषु चुल्हकेषु वारि क्षिप्तम् । एवं मध्यान्हे सर्वस्मिंल्लोके मिलिते भोक्तुं समुत्सुक आसनानि मण्डितानि । पङ्क्तिरुपविष्टा । ततो यावता भौतिको मठोद्वारमुद्घाट्य पश्यति तावता किमपि न पश्यति । रिक्तैव मठी । ततः स तरललोचन इतस्ततः कोणकादिकं सर्वं विलोकयति । परं किमपि न पश्यति । तावता तथैव रात्रिवन्मण्डपे पटीं विस्तार्य स्वप्नार्थं सुप्तः । लोकाः सर्वेपि बुभुक्षया म्रियमाणाः परिवेषणाय तमाकारयन्ति । कथयन्ति च । कुतः स्वपिषि । कस्मान्न परिवेषयसि । स प्रतिवक्ति । 'भो लोकास्तावता प्रतीक्षध्वं यावता विविधपक्वान्नाविभृतमठिकां स्वप्नदर्शनवत्संप्रत्यपि दृष्ट्वा सर्वं भोज्यमानीय युष्मान्भोजयामि ।' इति तद्वाक्यश्रवणोद्भूतकोपाटोपा लोकास्तन्मौर्ख्यं निंदंतः स्वगृहे गताः कण्टेन पाश्चात्यप्रहरे भुक्ताः । एवं धीमद्भिः स्वप्नोपलब्धमात्रेण न प्रवर्तितव्यम् । इति द्वितीया कथा ॥२॥

माया क्वापि न कर्तव्या सुधिया स्वहितैषिणा ।
सानर्थाय कृता कन्याथिके भरटके यथा ॥

गङ्गातीरे भीमपुरं नाम पुरम् । तदुपरिष्टात्सुवर्णपुरमस्ति । तत्र सुलोचनः श्रेष्ठी वसत्यत्यन्तधनी भौतिकभक्तश्च । तस्य पद्मिनी भार्या । तयोः सुखमनुभवतोः सप्तसुतोपरि बहु प्रार्थ्यमानैका रुक्मिणी नाम कन्या जाता । सा क्रमेण वर्धमाना

चतुःषष्टिस्त्रीकलासंयुक्ता सर्वलक्षणोपेता पित्रादीनामत्यन्तवल्लभाभूत्। अथ च भीमपुरात्परस्मिन्भागे योजनांतरिता भौतिकमठी समस्ति। तस्यां दमनको नाम जटी कौटिल्यपात्रं बहुच्छात्रपरिवृतो वसति किञ्चिदतीतादिनिमित्तभाषको लोकमान्यश्च। स एकदा सुलोचनश्रेष्टिना निजगृहे भोजनायाकारितो महारसवतीं भोक्तुमुपविष्टः। तस्याग्रे रुक्मिणी रणन्मणिनूपुरकङ्कणाद्याभरणभूषिता यौवनोद्भूतरूपातिशया गङ्गडत्पट्टकूलपरिधाना सरङ्गनीरङ्गीछादितशिरा मौक्तिकखचितकञ्चुका पाणिगृहीतमहार्ध्यतालवृन्तेन बीजयन्ती स्थिता। ततश्च स जटी तां सर्वाङ्गसुन्दरीमादरान्निरूप्य कामपीडितो विस्मृतभोजनरसश्चिन्तयितुमारब्धः। यथा। मनुष्यमध्य एवंविधा अपि रूपपात्रस्त्रियो भवन्ति यदि तदा स्वर्गे किमस्ति। तपस इदमेव मुख्य फलं। यतः।

त्वं प्रिया चेच्चकोराक्षि स्वर्गलोकसुखेन किम्।
त्वं प्रिया यदि न स्या न्मे स्वर्गलोकसुखेन किम्॥

हरिहरचन्द्रसूर्यादीनां च यथा रसस्वीकराणामपि देवत्वं यथा च वसिष्टगौतमादीनां सजायानामपि ऋषित्वं च न विरुद्धं तथा ममाप्यनया सह ऋषित्वमस्तु। मागिता त्वियं व्यवहारिणा सर्वथा न दास्यते। गृहीता तु विलोक्यत एव। अतो मायैव श्रेयसी। तां विना क्वापि कार्यसिद्धिर्न भवति। इति तां कर्तुं प्रवृत्तः। निःशेषस्य तद्ग्रहणध्यानलीनस्य भोजनादि विस्मृतम्। शून्यचित्त इव स्थितः। श्रेष्टिना पृष्टः 'कुतोकस्माद्भवद्भिरार्तध्यानपरैर्न भुज्यते'। स मायया वक्ति 'भोः श्रेष्टिन्, किं भुज्यते यस्य यजमानस्य गृह ईदृशी कुलक्षयकारिणी कुलक्षणा कन्यास्ति। तेन सम्प्रत्येतस्याः कुलक्षणदर्शनेन मम भोजनं विषप्रायं जातम्। जानामि सम्प्रत्येवोत्थाय यामि। ततः श्रेष्टिनोक्तं "गुरो अस्यां जातायामस्माकं कुलं सर्वप्रकारैर्वृद्धिं प्राप्तम्। भवद्भिर्ज्ञानिभिस्त्वेवं विरुद्धं कथं कथ्यते?" पुनः स वक्ति। 'तावत्तव तव कुलवृद्धिर्यावता पाणिग्रहणं न भविष्यति। तदनु च तव कुलस्य श्वशुरकुलस्य च क्षयकारी भविष्यति। ततः श्रेष्टी मूढचित्तः पुरापि तद्वचनप्रत्ययाद्भयभ्रान्तो वक्ति। 'अत्र भवन्त एव सर्वज्ञा अस्मत्कुलगुरव उचितोपदेशं ददतु किं कर्तव्यमिति।' ततः स वक्ति। 'मम तपोधनस्य ब्रह्मचारिणोनया वार्त्तयापि किं कार्यम्। ततः श्रेष्टिनात्यादरेण पादयोर्लगित्वा पृष्टः स वक्ति। 'मया कथयिष्यते कोप्युपायः परं भवद्भिर्न करिष्यते।' श्रेष्टिनोक्तं। किमेवं कथ्यते। भवतां सदापि हितानां वचनं कथं न प्रमाणीक्रियते। इत्यादि दृढं तर्जयित्वा प्रोक्तम्-'श्रेष्टिन् तर्हि शृणूपायम्। सालंकारां चंदनकर्पूरादिचर्चिताङ्गीं सुवसनामेनां काष्टमञ्जूषामध्ये क्षिप्त्वा गङ्गामध्ये निवाह्यते कृष्णचतुर्दशीदिने पाश्चात्यरात्रौ गृहे च होमः कार्यते। एवं च कृते परगृह एवानर्थदा भविष्यति न भवत्कुले।' तद्दिनोपरि सर्वां सामग्रीं कारयित्वा स जटी स्वमठ्यामागत्य शिष्याणामग्रे वक्ति। 'भोः शिष्याः कृष्णचतुर्दशीदिने मम मन्त्रसाधनास्ति। तदर्थं मद्भक्तिसन्तुष्टा गङ्गादेवी मह्यमुपहारभूतां मञ्जूषां प्रातः सूर्योदयवेलायां दास्यति। अतो युष्माभिः

सावधानीभूय गङ्गाप्रवाहमध्यादागच्छन्ती साकर्षणीया। समुद्रेव मठीमध्ये क्षेप्या।' इत्यादिशिक्षां दत्त्वा स तद्दिने रात्रौ होमशान्तिकार्थं श्रेष्ठिगृहे गतः। शिष्या नदीतटे स्थिताः। सतः ससप्तपुत्रेण श्रेष्ठिना भृशं शोकाकुलेन साहसमवलम्ब्य तथा सर्वं गुरूक्तं कृतम्। ततः सा मञ्जूषा श्रेष्ठिना पाश्चात्यरात्रौ गङ्गामध्ये क्षिप्ता। श्रेष्ठी सकुटम्बो गृहे गत्वा शोकादि कृतवान्। ततः सा मञ्जूषा प्रभोदयवेलायां भीमपुरासन्नागता। तन्नगरस्वामिनः पुण्यसारनृपस्य सेवकैर्दन्तधावनार्थं गङ्गायां गतैर्दृष्टानीता च नृपाग्रे। यावता राजा द्वारमुद्घाटयति तावता तादृशीं कन्यां दृष्ट्वा भृशं विस्मितो मन्त्रिणं पृच्छति। 'भो मन्त्रिन्, किमिदम्?' ततो मन्त्रिणा सा कन्या पृष्टा 'का त्वं? कस्य सुता? कथमत्रायाता?' सा लज्जयावाङ्मुखी वक्ति 'अहं सुवर्णपुरवासिसुलोचनश्रेष्ठिनोभीष्टा पुत्री कुलगुरुदमनकजटिना सह किमपि मन्त्रयित्वा पित्रात्र क्षिप्त्वा वाहिता। अपरं किमपि न जाने।' ततो मन्त्रिणा बुद्ध्या तत्स्वरूपं सर्वं सम्यक् ज्ञात्वा राज्ञो विज्ञप्तम्। ततो राज्ञा तां कन्यां लात्वा मञ्जूषायां मर्कटिका क्षेपिता। ततस्तथैव मुद्रां दत्त्वा मञ्जूषा गङ्गामध्ये राजपुरुषैर्वाहिता। राजपुरुषाश्च प्रच्छन्नीभूय पृष्ठौ लग्नाः। ततस्तदीयशिष्यैः प्राग्दत्तसङ्केतैर्मञ्जूषाकर्षिता। समुद्रेव मठीमध्ये क्षिप्ता। ततः सन्ध्यायां प्रकृष्टप्रमोदमेदुरांगस्तस्याः सङ्गमिच्छन् जटी पवित्रीभूय शुचिवस्त्राद्यलंकृतः स्वशिष्याणां संकेतयति। भोरहमद्य रात्रौ मन्त्रसाधनाय मठीमध्ये स्यास्यामि। तत्र च भूयांसो विघ्ना भविष्यन्ति। अतो भवद्भिर्मठीतो दूरे स्थित्वा सावधानीभूय स्थेयम्। मठीद्वारं तु नोद्घाटनीयमेवेत्यादि। स स्वयं भोगार्थी मध्ये प्रविश्य यावता मञ्जूषाद्वारमुद्घाटयति तावतातिबुभुक्षया पीडिता नियन्त्रणारुष्टा मर्कटी तं भौतिकं कर्णनासिकादिषु विलूनयामास। ततः स मध्यस्थो भौतिकः पूत्करोति। शिष्यानाकारयति। तथापि शिष्या विनीताः प्रागवारिता नायान्ति। ततो महता कष्टेन तेन स्वयमेव द्वारमुद्घाट्य निर्गतम्। ततो राजपुरुषैर्बद्ध्वा स राज्ञोग्रे नीतो देशाद्बहिष्कृतः। सा च कन्या सर्वगुणमयी राज्ञोग्रमहिषी बभूव। तस्याः प्रभावेण राज्ञो राज्यवृद्धिः। पश्चात्पितुर्मिलिता। सर्वकुटंबस्यानंदः॥ इति तृतीया कथा॥३॥

विना गुरूपदेशं यो यथादृष्टि प्रवर्तते।
स एव हसनीयः स्यात् जटिनो मूर्खशिष्यवत्॥

वर्धमानपुरे श्रीभटो भरटकः। तस्य धीजडो नाम शिष्योतिमूर्खः। स एकदा नगरमध्ये भिक्षार्थं गतः। तत्र च कस्यचित्सूत्रधारस्य गृहे सूत्रधारेणातिवक्रं वंशं तैलाभ्यङ्गपूर्वं वह्नितापनेन सरलीक्रियमाणं ददर्श। तं तथा कुर्वन्तं दृष्ट्वा स धीजडः सूत्रधारं पप्रच्छ "किमिदं क्रियमाणमस्ति?" ततस्तेनोक्तं। वक्रवंशस्य सरलत्वम्। ततः स चिन्तयति। वातविकारेण वक्रीभूतस्य मद्गुरोरपीदमेवौषधं भवतु। सर्वत्रा-ययमेव सरलीकरणे प्रकारः। ततः स धीजडो मठिकां गत्वा स्वगुरुं तैलाभ्येङ्गपूर्वकं वह्नावत्यर्थं तापयति स्म। तापदूनश्च वराको गुरुः पूत्करोति स्म। तदाक्रन्दं च श्रुत्वा

भूयांल्लोको मिलितस्तं वारयति स्म–'अरे मूर्ख मैवं स्वगुरुं विडम्बय । एवं क्रियमाणे हि वृद्धस्यास्य प्राणा एव यास्यन्ति ।' एवं लोकाक्रोशाञ्छ्रुत्वा स प्रतिवक्ति । यथा 'भवन्त एव मूर्खा भवतां च जनका मूर्खाः । अहं च स्वगुरोर्वक्रस्य सरलत्वं कुर्वाणोस्मि । भवतां केयं परितप्तिः ।' ततो लोको वह्वाक्रोशयन् बलात्कारेण तं मोचयामास । एवं बुद्धिमद्भिर्न कार्यं ॥ इति चतुर्थी कथा ॥४॥

तपोजापक्रियापाठगुणनानि विनाप्यहो ।
लभन्ते केपि भोज्यादि यथेष्टं जटिशिष्यवत् ॥

गोदकग्रामे सरडको नाम भरटकाचार्यः । तस्य भूयांसः शिष्याः सन्ति । परं ते न किमपि पठन्ति गुणयन्ति क्रियां च कुर्वन्ति । किन्तु निद्रावार्त्ताविकथादिपरास्तिष्ठन्ति । तथापि तत्रत्यो भृशं मूर्खो लोकस्तद्गुणरञ्जितो हसहसिकापूर्वमेतेषां भोजनवस्त्रादि ददाति वह्वादरेण । तेन प्रतिदिनं यथेच्छाहारविहारादिभिस्ते शिष्याः पुष्टवपुषो महिषप्राया जाताः । तत एकदा तद्ग्रामवासिना ग्रामभट्टब्राह्मणेन वासितविदुषा ग्राम्यकविना बहुयाचनेपि किमप्यलभमानेन तान्दृष्ट्वा विस्मयापन्नेन ते साश्चर्यमुपश्लोकं पठिताः । यथा ।

भरटक तव चट्टा लंबपुट्ठाः समुद्धा
न पठति न गुणते नेव कव्वं कुणंते ।
वयमपि च पठामो किंतु कव्वं कुणामो
तदपि भुव मरामो कर्मणां कोत्र दोषः ॥

इत्यादि लोकानां पुरस्तात्सर्वत्र स कथयति स्म च । लोकानामपि चाश्चर्यम् । इति पञ्चमी कथा ॥५॥

आत्मकष्टं प्रकाशन्तो येषां तेषां यथा तथा ।
दोरिकाकर्षकजटी यथा दुःखी पुराभवत् ॥

विकटग्रामे सोमको भरटको वसति । स चैकदा वर्षासक्तो स्वमठिकां तृणैश्छादयित्वोपरिष्टाद्दोरिकां बध्नानोधोमस्तकेन पतितो भृशं पीडितश्च । वपुषि व्रणान्यपि जातानि । ततस्तं पीडितं भाषणाय लोक आगच्छति पृच्छति च । भोः किं जातम् ? कथं च पीडितः ? स मूर्खं उत्थाय तथा कृत्वा लोकानां दर्शयति । एवं पतितः पीडितश्च । एव प्रतिजनं तथा कुर्वाणस्तथा पीडितो यथोत्थातुमपि न शक्नोति । पुनर्लोकपृच्छायां कथयति । भवतां जनको दर्शयिष्यति । अतः परं लोकस्तं हसन् स्वस्थाने जगाम । इति षष्टी कथा ॥६॥

मूर्खशिष्यो न कर्तव्यो गुरुणा सुखमिच्छता ।
विडम्बयति सोत्यन्तं यथा वटकभक्षकः ॥

कटेरकग्रामे लुण्ठको जटः । तस्य कुण्ठको नाम शिष्योतिमूर्खो भक्षकश्चास्ति । स एकदा यजमानगृहे कस्मिन्नप्युत्सवे जायमाने द्वात्रिंशद्वटकानि भिक्षायां लब्धवान् । ततः स मठिकामागच्छन्नन्तराले बुभुक्षापीडितश्चिन्तयति । इयतां वटकानां मध्ये गुरुर्मह्यं स्वार्धं दास्यति । तर्हि सम्प्रत्येवाहमात्मीयमर्धं भक्षयामीति षोडश वटकानि भक्षितानि । पुनर्विचारयति । इयतामप्यर्धं दास्यति गुरुरिति स्वार्धमष्टरूपं भक्षयामीति अष्टौ भक्षितवानिति । तावद्वटकार्धं लात्वा स्वगुरोः पार्श्वे शिष्यो मुमोच । गुरुणोक्तम् । 'भोः किमिदम् ? भवतो यजमानेन ···इयन्त एव वटकानि दत्तानि ?' स वक्ति 'द्वात्रिंशद् ···वटकान्येव दत्तानि । परं मया भक्षितानि ।' गुरुणोक्तं । कथं । ततः स शिष्यः शेषमर्धमपि गुरोः पश्यत एव मुखे क्षिप्त्वा कथयति । मयैवं भक्षितानि । गुरुः स्वयमेव बुभुक्षित एव स्थितः । लोकानां तज्ज्ञाने विस्मयः । इति सप्तमी कथा ॥७॥

आत्तव्रताः स्वसङ्कल्पात् प्रवर्तन्ते यथा यथा :
विडम्बयन्ति ते प्रान्तेइक्षुग्राहिकभिक्षुवत् ॥

मल्लानकग्रामे निस्संगो नाम जटी । आन्ते वयसि वर्तमानो धर्मार्थी सन्न कस्यापि सत्कमदत्तं गृह्णाति । स एकदा पुरबहिर्भ्रमन् क्वापि इक्षुवाटके सरसेक्षुदण्डान्दृष्ट्वा जिघृक्षुरनुज्ञापनार्थं वाटकमेवमवादीत् । 'भो वाटक २ गृह्णामि त्रिचतुरानिक्षुदण्डान् । पुनः स स्वयमेवोत्तरयति । गृहाण पञ्चवान् । एवं स्वयमेवानुमतिं लात्वा पञ्चवानिक्षुदण्डान् गृहीत्वा याति । एवं सर्वदा क्रियमाणे धनिकेन ज्ञातम् 'को नाम पापिष्टो मदीयवाटिकादिक्षुदण्डान् गृहीत्वा याति । तदद्य प्रच्छन्नीभूय विलोकयामि ।' इति विचिन्त्य प्रच्छन्नीभूय स्थितः । ततस्तस्मिंस्तथा कुर्वति धनिकः प्रकटीभूय हक्कयामास । ततो जटी वक्ति । 'भो मा कुपः मा कुपः । अहं सर्वदापि मुक्तकाण्यैवेक्षुदण्डान् गृहीतवान् ।' धनिकेनोक्तम् "कथम् ?" तेन स प्रकारः कथितः । ततो रोषाध्मातेन तेन जटिनं दृढं बद्ध्वा कूपसमीपे च नात्वा । प्रोक्तं-कूप, कूप, कथय । आछुत्राद्दापयामि ते त्रिचतुरा डब्बिकाः । दापय पञ्चषाः । इत्युक्त्वा बहु विडम्ब्य वराको मुक्तः शिक्षितश्चातः परमेवं कदापि न कार्यमिति । इति अष्टमी कथा ॥८॥

स्वं प्रच्छन्नकृतं कर्म गर्हितं शङ्कया जडः ।
भाषते स्वयमेवात्र राजमान्यो जटी यथा ॥

सुप्रभपुरे रिपुमर्दनो नृपोभूत् । तत्र च धरटको नाम भरटकोतिदरिद्रो वसति । स एकदा लक्ष्मीसमुपार्जनार्थं विदेशे गतः । वाणारस्यां च पुर्यामेकस्मिन्दिने संपूर्णदिनं भोजनार्थं बभ्राम । परं भोजनं क्वापि नाप । ततो रात्रौ जातायां बुभुक्षया म्रियमाण स कस्यापि रजकगृहे जगाम । तत्र श्राद्धादिप्रकरणे जायमाने गृहस्वामिना भोजनाय निमन्त्रितः । तेनानन्यगतित्वेन तत्रापि भुक्तमाकण्ठम् । पश्चात्कालांतरेण स स्वपुरे समागात् । दैवानुकूल्याद्राजमान्यो राज्ञोतिप्रसादपात्रं स पुरोहितो बभूव । अन्यदा तत्र पुरे विदेशादेकं कलावन्नर्तकपेटकं समागात् । तेन

राज्ञोग्रे स्वकीया कला दर्शिता। अतिरञ्जितेन राज्ञा तस्य बहु दानं ददे। ततो राजमान्यत्वेन द्वितीयदिने तेन नटपेटकेन रात्रौ पुरोहितगृहे नाटकं मण्डितम्। भूयांसोपि लोका अवलोकका मिलिताः। ततस्तेन नटपेटकेन प्रहरत्रयं यावन्नानारूपरसोपेतगीत-ङ्गहाराङ्गविक्षेपहस्तकादिप्रकारैर्नाटकं कृतम्। परं तस्यातिमूर्खस्य पाषाणप्रायस्य पुरोहितस्य किमप्याश्चर्यं नाजायत। ततः स किमपि न दत्ते। ततः सूत्रधारो विलक्ष-श्चिन्तयति। नूनमयं महामूर्खः सर्वथायोग्यः संभाव्यते सरसकथारसानाम्। ततः कमप्यधीश्वरसत्कं प्रबन्धं मुग्धजनरञ्जनोचितं कौतुककारि प्रस्तावयामि यतस्तच्छ्र-वणात्सन्तुष्टो दानं ददाति। इति विमृश्य प्रस्तावयति। यथा।

कहिमु भरडक जं जं कीउं।

इतीदं श्रुत्वा स भरटकः स्वयं शङ्कितः। निश्चितमेष सूत्रधारो मदीयं वाणारस्यां रजकगृहे भोजनं जानाति। तल्लोकमध्ये मा प्रकाशयन्तु। इति हेतोः सुवर्णाभरणपट्टकूलादि बहु दानं दत्तम्। पुनर्लब्धोपायेन सूत्राधारेण तदेव पदं द्वित्र-वारं प्रस्तावितम्। भरटकेन पुनर्दानं दत्तम्। एवं तृतीयवेलायाम्। चतुर्थवेलायां कुपितेन भरटकेन स्वयमेव स्वकृतं दुष्कृतं प्रकटीकर्तुं प्रोक्तम् यथा। भोः सूत्रधार त्वं पुनः २ किं कथयसि कहिमु भ०—इत्यादि। याहि कथय। मया वाणारस्यां बुभुक्षया म्रिय-माणेन रजकगृहे भुक्तम्। एतदेव कथयसि। कथय तर्हि। अतः परं किमपि न ददामि। तच्छ्रुत्वा लोकः सर्वो विस्मितः। नाटकं विसर्जितम्। इति नवमी कथा ॥९॥

व्यवहारमजानानो नरः शोभां बिभर्ति नो।
लोकोपहासं चाप्नोति शण्डदोग्धा यथा जटी॥

सुस्थितग्रामे बहवो भरटका वसन्ति। एकदा तैर्भिक्षायां गतैः कस्यापि कौटुम्बिकस्य गृहे पायसं घृतशर्करोपेतं लब्धम्। तैस्तद्भुक्तम्। जिह्वायां लग्नम्। तदुत्पत्तिर्भरटकैर्यजमानेभ्यः पृष्टा। तैः स प्रकारः प्रोक्तः। ततो द्रव्येण तैरेका गौः क्रीता नवप्रसूता दुर्बला च। ततोन्यैर्भरटकैः प्रोक्तम्। भो मूर्खा भवद्भिरेषा दुर्बला गौः किमर्थं क्रीता? एषा च लघुस्तनी। स्वल्पमेव दुग्धं दास्यति। अतोस्याः परावर्तनाद-परा पुष्टा स्थूलस्तनी गौरानीयताम्। ततस्तां लात्वा पञ्चषाजटिनो मिलित्वा गोकुले गताः। ततो गोकुलपतेरुक्तम्। इमां लात्वास्माकमपरा गौर्दीयताम्। ततस्तेनोक्तम् भो भवतां या रोचते तां गृह्णीत तासु मध्ये। ततस्तैर्महामूर्खैः सर्वतो विलोक्य दुर्बलत्वेन सर्वा गास्त्यक्त्वैकः पुष्टः शण्डो गोबुद्ध्या जगृहे। ततस्तं स्वगृहे नीत्वा यावता सर्वेपि जटिनो दोहाय प्रवृत्तास्तावता बिन्दुरपि न निर्गतः। ततस्तेत्यादरेण दोहाय प्रवृत्ताः। ततो गाढपीडने तेन पादप्रहारं दत्त्वो-त्पतितम्। ततः सर्वेपि विलक्षीभूताश्चिन्तयन्ति 'कुतो दुग्धं न निर्गच्छति?' तत एकेन वृद्धजटिना महाबुद्धिमता प्रोक्तम् 'भो भरटका यूयं कारणं न जानीत।' ततोपरैरुक्तं 'भोः किं कारणम्?' इति पादयोर्लगित्वोक्तम्। ततस्तेनोक्तं 'एतस्या गोः स्तने छिद्रं

नास्ति । तेन दुग्धं न निस्सरति ।' अपरैरुक्तम् 'सत्यं रे सत्यम् !' तत एकस्य जटिनो जटाभिरग्रे तनपादयोर्बद्धः शण्डो द्वितीयस्य तु जटाभिः पाश्चात्यपादयो । एवं कृत्वा केनचिज्जटिना स्यूतकेन वृषणे छिद्रं कर्तुं प्रारब्धम् । तावता स उत्पत्य पलायितः । जटिनोर्जटास्त्रुटिताः । लोका बुम्बापरा मिलिता हसन्तस्तेषामाक्रोशान्दद्युः । ततस्ते भरटका अस्माकं गौर्गच्छति २ इत्यालपन्तः पृष्ठौ लग्नाः । एवं तेषां पश्यतामेव स शण्डो वने गतः । ततः सर्वेपि जटिनो मिलित्वा मन्त्रयन्ति । यथा । इयं गौर्न भव्या । पुनर्नवीना गृह्यते । इति पञ्चशतं द्रम्मा लात्वा सार्थेन सहैको भौतिको विशिष्टधेनुग्रहणाय चलितो ग्रामान्तरं प्रति । रात्रावन्तराले क्वापि देवकुले पञ्चभिः सार्थिकैः साकं शयितः । मध्यरात्रेपरेषु निद्रयाघूर्णमानेषु तस्मिंश्च भरटके जाग्रति चौरा आगताः । तैस्तं जीर्णशटितवाससं भूतखरटिकं च दृष्ट्वा प्रोक्तं । 'भोः किमनेन मुषितेन ? अयं कोपि रङ्कः शयितोस्ति । अतः स्थानान्तरं गम्यते ।' एवं तदालापं श्रुत्वा जटी वक्ति । 'भवन्तो रङ्ककाः । भवतां जनको रङ्कः । अहं धनी । मम पञ्चशतं द्रम्माणामस्ति । इत्युक्त्वा ग्रन्थिं वादयित्वा दर्शयति 'यदि च न मन्यध्वे तदैतान्सार्थिकान्पृच्छत ।' ततश्चौरैः पश्चाद्वलित्वा प्रथमं स पूर्वं लुण्टितः पश्चात्सर्वेपि लुण्टिताः । ततस्तैराक्रुष्टो भौतिकः शिरः कण्डूययित्वा स्वगृहं आगतः । एवं न कार्यम् । इति दशमी कथा ॥१०॥

स्वयं मूर्खालसो यश्च परवागविचारकः ।
स दुःखी स्याद्यथा शीतपीडितो जटिलः पुरा ॥

कुरडग्रामे धरडो नाम भरटकोभून्मूर्खोत्यलसशिष्ययुतः । एकदा शीतर्तौ स्फीते शीते पतति मध्यरात्रे स भौतिको लघुनीत्यर्थं मठ्या बहिर्निर्गतः । तां कृत्वा स भृशमलसत्वेन तत्रैव स्रस्तरभ्रान्त्या पपात निद्राघूर्णमानः । पाश्चात्यप्रहरे स शीतेन भृशं पीडितः कोकूयते । शिष्यस्य च कथयति । भोः शिष्य किमहं स्रस्तरे मठीमध्ये वास्मि । बहिर्वाचं श्रुत्वा सोपि तादृगेवालसः शयित एव स्वहस्तेन गुरोः स्रस्तरं विलोकयति । तत्र शयितस्य शुनः पुच्छं तस्य करे लग्नम् । ततः शिष्यो वक्ति । 'भो गुरो तव पुच्छमस्ति न वा ।' सोपि तच्छ्रुत्वा स्वकच्छोटिकां करेण सम्भाव्य वक्ति 'भोरस्ति मम पुच्छम् ।' ततः शिष्येणोक्तम् 'तर्हि मठीमध्ये स्रस्तरे त्वमसि ।' ततः स तद्वचनप्रत्ययेन स्वमौढ्येन च तत्र पतित एव शीतेन पीडितो मृत इव जातः । प्रातर्लोको मिलितः । तं तथा पतितं दृष्ट्वा लोकः पृच्छति । भोः किं जातं । शिष्यो वक्ति 'नाहं जाने ।' पश्चात्तूर्यकरस्पृष्टः प्राप्तचैतन्यो भौतिक उत्थापितः । लोकानां तु कौतुकमभूत् । इत्येकादशकथा ॥११॥

औषधाढ्यो न कार्यज्ञो मूर्खं पश्येद्यथाजटी ।
वैद्यातिविषदानेपि विषेणामारयद्गुरुम् ॥

कोलकग्रामे वृद्धो जूटको जट्यस्ति । स एकदा ज्वरविकारेणात्यर्थं पीडितः । सन्निपाताधिक्ये जाते तदीयशिष्येण वैद्यगृहे गत्वौषधं पृष्टम् । तेनातिविषमुत्काल्यदेय-

मित्युक्तम्। शिष्येण मार्ग आगच्छता चिंतितम्। वैद्येनातिविषमुक्तम्। मम गुरुस्तु भृशं दुर्बलः। तेन प्रथममतिविषं न सहिष्यते। ततः प्रथमं विषं ददामि तस्य ज्वरे त्वतिविषम्। इति गान्धिक्यहट्टाद्विषमानीय घोलयित्वा स्वगुरोर्दत्तम्। तेन गुरुः शीघ्रं ममार। लोकैः शिष्यो निन्दितः। एवं न कार्यम्। इति द्वादशमी (?) कथा ॥१२॥

विचार्य वेलां प्रष्टव्यः सन्देहो न यथा तथा।
दृष्टान्तोत्र स्वर्गधेनुपुच्छलग्नजटिव्रजः ॥
सर्वेपि लोभिनो यत्र मन्दबुद्धिजनाश्रिताः।
तत्र नैवानुगैर्भाव्यं तां श्रुत्वा मौदकीं कथाम् ॥

सुघोषग्रामे भूमांसो जटिनो वसंति। तेषां मध्य एकः सर्वपशु नामा जटास्ति। तेनैका वाटिका कृता। सा कियद्भिर्वर्षैर्दिव्यद्रुमपुष्पफलोपचिता स्ववाटिकाकल्पाजनि। तस्यां रात्रौ कामधेनुरागत्य चरति। प्रभातप्रायायां रात्रौ पुनः स्वर्गेणोत्पत्य याति। एवं प्रत्यहं तया विनाश्यमानायां वाटिकायां घनिकजटिना रात्रौ सावधानीभूय स्थितम्। तावता गौरागता। तां संपूर्णां रात्रिं यावच्चरित्वा पश्चात्यरात्रौ स्वर्गंच्छन्तीं दृष्ट्वा जटी पुच्छे विलग्नः स्वर्गं गतः। तत्र सरसमोदकादि भक्षितं प्रीतश्च तद्रसेन। पुनरन्यदिने तत्रत्यमेकं सिंहकेसरमोदकं लात्वा तस्याः पुच्छे विलग्य स्ववाटिकायामायातः। प्रातः स्वगृहे गतः। अन्ये जटिनो मिलिताः। तैः पृष्टं 'त्वं क्व गतोभूः ?' स वक्ति "अहं स्वर्गं। तत्रेन्द्रचन्द्रेश्वरविनायकादयो दृष्टाः। ईदृशाश्च मोदका भक्षिताः।' इत्युक्त्वा तान्दर्शयति। तैर्भौतिकैस्तस्य खण्डं-खण्डं भक्षितम्। जिह्वायां लग्नम्। तैरुक्तम्—'भोरस्मानपि स्वर्गं नय यतो वयमपि स्वर्गं पश्यामस्तत्सत्कान्मोदकान्भक्षयामः'। ततस्तेनोक्तम्— 'सर्वेपि मया सह वाटिकामध्य आगच्छन्तु। प्रच्छन्नास्तिष्टन्तु।' यदा गौश्चरित्वाकाश उत्पतति तदाहं तस्याः पृच्छे लगिष्यामि। मम पादेन्येन तस्या अपरेण लगनीयम्। एवं सर्वैरपि श्रेणिः कार्या। एवं कृत्वा सर्वेप्युत्पतिताः। अर्धमार्गगमन एकेनाधःस्थेन सन्देहः पृष्टः। भोः स्वर्गे कियन्माना मोदकाः सन्ति। ततो मुखभरटकेन भृशं मूर्खेण गोः पुच्छं मुक्त्वा हस्ताभ्यां दर्शितम् भोरियन्मानास्ते सन्तीति। ततः सर्वेपि भूमौ पतिताः। एवमनवसरे सन्देहो न प्रष्टव्य। इति त्रयोदशकथा ॥१३॥

वाक्यतत्त्वमजानंश्च यथादृष्टप्रवर्तकः।
वैद्यपिट्टितपुत्रेक्षिजटिवद्राजते नहि ॥

कोरण्टकग्रामे बधिरो वृद्धो जडो वसति। तस्य शिष्यो वाधिर्यदूनस्तद्व्यपगमोपायान्मार्गयति। एकदा भिक्षायै स कश्यचिद्वैद्यस्य गृहे जगाम। पूर्वमपि च तस्य वैद्यस्य गृहेष्टवर्षीयो बालः पित्रा लेखशालागमनाय शिष्यमाणोस्ति। पित्रा बहु वादितोपि रोषात्स नोत्तरयति। ततः पित्रोक्तम् 'भोः किं न शृणोषि।' तथापि न वदति। ततो भृशं रुष्टेन पित्रा स्तम्भे दृढं बद्धः चपेटयता पिट्टितो वदति। 'तात शृणोमि

शृणोमि इति । द्वारस्थो भौतिकः श्रुत्वा विमृष्टवान् । बाधिर्यव्यपगमस्येदमेवौषधम् । मम गुरोरपि करोमि । मठ्यां गत्वा तथा कुर्वतः शिष्याल्लोकैर्बलात्कारेण गुरुर्मोचितः । प्रोक्तं चारे मूर्ख कुशिष्य कुतोतिजरसं स्वगुरुं पिट्टयसि । ततः स वक्ति 'यूयं मूर्खाः किं जानीथ । अहं स्वगुरोर्बाधिर्यव्यपगमौषधं कुर्वाणोस्मि । भवतां का नाम तप्तिः ।' लोकैरुक्तं । अरे इदमौषधं तव केनोक्तं । तेनोक्तं । मयाद्यैव वैद्यगृहगतेन बद्धेन स्वपुत्रस्य क्रियमाणं दृष्टं । तस्य बालकस्य तत्कालमेव गुणोभूत् । ततो लोकैर्विशेषत आकृष्टं । एवं बुद्धिमता न कार्यं ॥ इति चतुर्दशी कथा ॥१४॥

मूर्खेण विहितं कार्यमुपहासाय जायते ।
गुरुभार्यानयकस्य शिष्यस्यात्र निदर्शनं ॥

सूर्यपुरे पुरे मोकलिर्नाम जटी । तस्य चेटकः शिष्योस्ति भृशं मूर्खशेखरः । स एकदा गुरुणा भार्यानयनार्थं श्वशुरगृहे प्रहितः शिक्षा च दत्ता । यथा । भोस्त्वया तत्र गतेन गम्भीरेण भाव्यं । पंचोच्चानि पंच नीचानि वाच्यानि । इत्यादि । ततः स गुरुश्वशुरगृहे गत्वा तत्संबंधिभिः कुशलवार्त्तां पृष्टः सन् गुरोः शिक्षां हृदये निधाय प्रथममुच्चं प्रोक्तं । यथा पर्वत-पर्वत इति । ततो नीचं प्रोक्तं । यथा डोलि-डोलि रिति वक्रम् । यथा दात्रं दात्रम् इति । प्राग्वरं यथा वंश-वंश इति । गृहमध्ये गत्वोच्चं विलोक्य कोष्टिकामुपरि चटितः । ततो नीचं गर्तं विलोक्य तत्र पतितः । इति तत्त्वं पृष्टोपि न वक्ति । ततस्तैरनुमानेन विचारितम् । यथा । पुत्रीपतिर्भरटको वंशं छेत्तुं क्वापि वने पर्वते चटितो दात्रेण तं छिंदानो विस्खलितपादो (गर्ते) पपात । ततो मृतो भविष्यति । अयं स्पष्टं न वक्ति गंभीरत्वेन । तावता स भौतिकशिष्यः किंचिद्वसित्वा विच्छायवदनीभूतः । तं तथाविधं दृष्ट्वा सर्वैरपि तत्रत्यैः सहसा पृष्टश्चक्रे । यथा । 'हा दैव त्वया पापिष्टेन किं कृतम् इयं वराकी भरटिका रण्डिता । ततः सोपि मूर्खस्तेषां पूत्कारं श्रुत्वा रुरोद । द्वित्रिदिनानन्तरं स एवमेव स्वस्थान आगतो गुरुणा पृष्टः । भो भरटिका कस्मान्नानीता । स पूत्कारपूर्वं वक्ति 'सा वराकी रण्डिता ।' ततो गुरुरपि मुक्तकंठं रोदितुं प्रवृतः शिष्योपि च । प्रातिवेश्मकलोका मिलिता रोदनकारणं पप्रच्छुः । भरटको वक्ति—'भिक्षितोहम् ! मम वराकी भरटिका रण्डिता ।' लोका वदन्ति 'अरे मूर्ख त्वयि जीवति सा कथं रण्डिता ?' स वक्ति 'अहं किं जाने । अयं मच्छिष्यः सम्प्रत्येव तस्याः पितृगृहाच्छुद्धि त्वागतः । लोकैर्हसद्भिरुक्तम्—'भोः पत्यौ जीवति स्त्री रण्डा न भवति । स न मन्यते । ततोनेकैः शपथैर्दृष्टान्तैश्च बोधितः । इति पंचदशी कथा ॥१५॥

केचिज्जडधियः कार्ये पारम्पर्यं न जानते ।
पात्रपक्षद्वयात्क्षिप्ते घृततैले तपस्विना ॥

लक्ष्मीपुरे पुरे धक्कटो जटी यस्ति । तस्य मोढकः शिष्योतिमूर्खः । स एकदा गुरुणा घृततैलानयनाय हट्टे प्रेषितः । तेन तदर्थमेकमेव घृतैकडुच्छकं गृहीतं । तस्य कस्यचिद्वणिजो हट्टे मूल्यमर्पयित्वा घृतमेकस्मिन् पक्षे प्रथमं क्षेपितम् । पुनस्तैलं

विपर्ययं कृत्वा द्वितीयपक्षे क्षेपितम्। एवं मठ्यामगत्य गुरोर्दर्शितं कथितं च मया घृततैले आनीते स्तः। गुरुणोक्तम्—'क्व ?' तेन दर्शितम्—'इदं तैलम्।' गुरुणोक्तम्—'घृतं क्व ?' शिष्येन धूपदहनस्य विपर्ययं कृत्वा दर्शितम्—'इदं घृतमिति।' तावता तैलमपि भूमौ पपात। एवं द्वयमपि त्यक्तम्। एवं न कार्यम्॥ इति षोडशमी (?) कथा ॥१६॥

बहुनापि विचारेण न मूर्खस्तत्त्वमीक्षते।
यथा शण्डविषाणान्तः क्षिप्तमौलिर्जटी पुरा॥

मङ्गग्रामे सुविचारो नाम जट्यस्ति। स भिक्षार्थं कस्यचिद्गृहे याति। तस्य च गृहे एकं वृत्तशृङ्गं स्थूलवपुषं शण्डं पश्यति। ततः प्रतिदिनं विचारयति। किं मम मस्तकमेतस्य शृङ्गयोरन्तराले माति न वेत्यादि। एवं षण्मासो जगाम। ततः स चिन्तयति। अद्य क्षिपामि शिरः। मम तु विचारयतः षण्मासो गता। एतावद्विचारेण कार्यं कृतं सुकृतं भवति। विमृश्य शिरः क्षिप्तम्। तावता षण्डो बन्धनं त्रोटयित्वा पलायितः पुरमध्ये बभ्राम च। जटी तु तदग्रे लम्बमानो विरौति। तावता भूयांसो लोका मिलिताः। तैर्महता कष्टेन मोचितः। ततो लोकैश्चोक्तम्—'अरे मूर्ख त्वमविचार्यकार्योसि। स वक्ति। भवन्तो मूर्खा अविचारितकार्याश्च। मया त्विदं कार्यं षण्मासविचारेण कृतम्। ततो लोकैराक्रुष्टम्। एवं बुद्धिमद्भिर्न कार्यं। इति सप्तदशमी कथा ॥१७॥

न कार्यः केवलोद्घोषः पदच्छेदमकुर्वता।
वैद्यवाक्याद्यथा मूर्खो जटी गुरुमपिट्टयत्।

सुवालाग्रामे टिक्कको जटी। तस्यैक उद्घोषकः शिष्योभूत्। एकदा तस्य गुरुः श्लेष्मविकारेण भृशं पीडितः। ततः शिष्येन वैद्यपार्श्वे तदौषधं पृष्टं। वैद्येनोक्तं। यथा। गुड। दाडिम। सूंठि। मिरी। इति। ततो मार्ग आगच्छञ्छिष्य उद्घोषयति पदच्छेदमकुर्वाणः। ततो मठ्यासन्नगमने जातं यथा। गुडदा। डिमसुं। ठिमिरीति। ततो मठ्यामागत्य प्रथममाद्यं गुडदा इत्यौषधं कृतम्। ततोग्रेतनौषधद्वयार्थं पृच्छायै पुनर्वैद्यगृहे गतः शिष्यः पृष्टं च—'भो वैद्य, मया त्वदुक्तं गुडदा इत्यौषधं स्वगुरोः कृतम्। अग्रेतनस्य डिमसुं ठिमिरी तस्य कोर्थः। ततो वैद्येनोक्तम्। 'महामूर्ख पापिष्ट किं कृतम् ? त्वया वराको गुरुर्मुधा मारितः।' पश्चात्तदौषधचतुष्कं व्यक्त्या प्रोच्यार्पितं च स्वगृहात्॥ इत्यष्टादशी कथा ॥१८॥

अनभिज्ञे गुरौ तत्त्वं कथं वीक्षेत शैक्षकः।
विद्युतं वीक्ष्य जटिनौ विवादप्रवणौ यथा॥

सोहलग्रामे करमन्दो जटी। तस्योभौ शिष्यौ। तावेकदा निशायां मेघमालाच्छन्ने नभसि विद्युद्घोषं दृष्ट्वा विवदाते। यथा। एकेनोक्तम्—भोः पश्य-पश्य।

